# Nīḻā Sūktam

[KYV – TS 4-4-12-5]

ॐ नीळादेवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः । गृणाहि ।

ॐ nīḻādēvīgm’ śharaṇamaham’
prapad’yē sutarasi tarasē namaḥa ।
gṛṇāāhi ।

घृतवती सवितराधिपत्यैः पयस्वती रन्तिराशा नो , अस्तु ।
ध्रुवा दिशां विष्णुपत्न्यघोराऽस्येशाना सहसो या मनोता ।

ghṛtavatī savitarādhipat’yai[fp]’
payas’vatī ran’tirāśhā nō , as’tu ।
dhruvā diśhāṁ’ viṣh’ṇupat’nyaghōrā (a)s’yēśhānā
sahasō yā manōtāā ।

बृहस्पतिर्मातरिश्वोत वायुः सन्धुवाना वाता , अभि नो गृणन्तु ।
विष्टम्भो दिवो धरुणः पृथिव्या , अस्येशाना जगतो विष्णुपत्नी ।

bṛhas’patir’mātariśh’vōta vāyus’ san’dhuvānā vātā ,
abhi nō gṛṇan’tu ।
viṣh’ṭam’bhō divō dharuṇa[fp]’ pṛthiv’yā ,
as’yēśhānā jagatō viṣh’ṇupat’nī ।

विश्वव्यचा , इषयन्ती सुभूतिः शिवा नो , अस्त्वदितिरुपस्थे ।

viśh’vav’yachā , iṣhayan’tī subhūtiśh’ śhivā nō ,
ast’vaditirupas’thēē ।

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

www.SaiVedam.net